# Bharatavarshavarnanam in Brahmandamahapurana

# બ્રહ્માણ્ડમહાપુરાણાન્તર્ગતે ભારતવર્ષવર્ણનમ્

## Document Information

Text title : Bharatavarsha Varnanam

File name : bhAratavarShavarNanam.itx

Category : misc

Location : doc_z_misc_general

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : brahmANDamahApurANam . vAyuproktaM pUrvabhAgaH . anuShaNgapAdaH - 2. adhyAyaH 16

Latest update : November 12, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2023

*sanskritdocuments.org*

# બ્રહ્માણ્ડમહાપુરાણાન્તર્ગતે ભારતવર્ષવર્ણનમ્

સૂત ઉવાચ -
એવમેવ નિસર્ગો વૈ વર્ષાણાં ભારતે શુભે ।
દૃષ્ટઃ પરમતત્ત્વજ્ઞૈર્ભૂયઃ કિં વર્ણયામિ વઃ ॥ ૧॥

ઋષિરુવાચ -
યદિદં ભારતં વર્ષં યસ્મિન્સ્વાયમ્ભુવાદયઃ ।
ચતુર્દશૈતે મનવઃ પ્રજાસર્ગેઽભવન્પુનઃ ॥ ૨॥

એતદ્વેદિતુમિચ્છામસ્તન્નો નિગદ સત્તમઃ ।
એતચ્છ્રુતવચસ્તેષામબ્રવીદ્રોમહર્ષણઃ ॥ ૩॥

અત્ર વો વર્ણયિષ્યામિ વર્ષેઽસ્મિન્ ભારતે પ્રજાઃ ।
ઇદં તુ મધ્યમં ચિત્રં શુભાશુભફલોદયમ્ ॥ ૪॥

ઉત્તરં યત્સમુદ્રસ્ય હિમવદ્દક્ષિણં ચ યત્ ।
વર્ષં તદ્ભારતં નામ યત્રેયં ભારતી પ્રજા ॥ ૫॥

ભરણાચ્ચ પ્રજાનાં વૈ મનુર્ભરત ઉચ્યતે ।
નિરુક્તવચનાચ્ચૈવં વર્ષં તદ્ભારતં સ્મૃતમ્ ॥ ૬॥

ઇતઃ સ્વર્ગશ્ચ મોક્ષશ્ચ મધ્યશ્ચાન્તશ્ચ ગમ્યતે ।
ન ખલ્વન્યત્ર મર્ત્યાનાં ભૂમૌ કર્મ વિધીયતે ॥ ૭॥

ભારતસ્યાસ્ય વર્ષસ્ય નવ ભેદાન્નિબોધત ।
સમુદ્રાન્તરિતા જ્ઞેયાસ્તે ત્વગમ્યાઃ પરસ્પરમ્ ॥ ૮॥

ઇન્દ્ર દ્વીપઃ કશેરૂમાંસ્તામ્રવર્ણો ગભસ્તિમાન્
નાગદ્વીપસ્તથા સૌમ્યો ગાન્ધર્વસ્ત્વથ વારુણઃ ॥ ૯॥

અયં તુ નવમસ્તેષાં દ્વીપઃ સાગરસંવૃતઃ
યોજનાનાં સહસ્રં તુ દ્વીપોઽયં દક્ષિણોત્તરાત્ ॥ ૧૦॥

આયતો હ્યાકુમાર્ય્યા વૈ ચાગઙ્ગાપ્રભવાચ્ચ વૈ
તિર્યગુત્તરવિસ્તીર્ણઃ સહસ્રાણિ નવૈવ તુ ॥ ૧૧॥

દ્વીપો હ્યુપનિવિષ્ટોઽયં મ્લેચ્છૈરન્તેષુ સર્વશઃ ।
પૂર્વે કિરાતા હ્યસ્યાન્તે પશ્ચિમે યવનાઃ સ્મૃતાઃ ॥ ૧૨॥

બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યા મધ્યે શૂદ્રાશ્ચ ભાગશઃ ।
ઇજ્યાયુધવણિજ્યાભિર્વર્ત્તયન્તો વ્યવસ્થિતાઃ ॥ ૧૩॥

તેષાં સંવ્યવહારોઽત્ર વર્ત્તતે વૈ પરસ્પરમ્ ।
ધર્માર્થકામસંયુક્તો વર્ણાનાં તુ સ્વકર્મસુ ॥ ૧૪॥

સઙ્કલ્પઃ પઞ્ચમાનાં ચ હ્યાશ્રમાણાં યથાવિધિ ।
ઇહ સ્વર્ગાપવર્ગાર્થં પ્રવૃત્તિર્યેષુ માનુષી ॥ ૧૫॥

યસ્ત્વયં નવમો દ્વીપસ્તિર્યગાયામ ઉચ્યતે ।
કૃત્સ્નં જયતિ યો હ્યેનં સંરાડિત્યભિધીયતે ॥ ૧૬॥

અયં લોકસ્તુ વૈ સંરાડન્તરિક્ષં વિરાટ્ સ્મૃતમ્ ।
સ્વરાડસૌ સ્મૃતો લોકઃ પુનર્વક્ષ્યામિ વિસ્તરાત્ ॥ ૧૭॥

સપ્તૈવાસ્મિન્સુપર્વાણો વિશ્રુતાઃ કુલપર્વતાઃ ।
મહેન્દ્રો  મલયઃ સહ્યઃ શુક્તિમાનૃક્ષપર્વતઃ ॥ ૧૮॥

વિન્ધ્યશ્ચ પારિયાત્રશ્ચ સપ્તૈતે કુલપર્વતાઃ ।
તેષાં સહસ્રશશ્ચાન્યે પર્વતાસ્તુ સમીપગાઃ ॥ ૧૯॥

અવિજ્ઞાતાઃ સારવન્તો વિપુલાશ્ચિત્રસાનવઃ ।
મન્દરઃ પર્વતશ્રેષ્ઠો વૈહારો દુર્દુરસ્તથા ॥ ૨૦॥

કોલાહલઃ સસુરસો મૈનાકો વૈદ્યુતસ્તથા ।
વાતન્ધમો નાગગિરિસ્તથા પાણ્ડુરપર્વતઃ ॥ ૨૧॥

તુઙ્ગપ્રસ્થઃ કૃષ્ણગિરિર્ગોધનો ગિરિરેવ ચ ।
પુષ્પગિર્યુજ્જયન્તૌ ચ શૈલો રૈવતકસ્તથા ॥ ૨૨॥

શ્રીપર્વતશ્ચિત્રકૂટઃ કૂટશૈલો ગિરિસ્તથા ।
અન્યે તેભ્યોઽપરિજ્ઞાતા હ્રસ્વાઃ સ્વલ્પોપજીવિનઃ ॥ ૨૩॥

તૈર્વિમિશ્રા જનપદા આર્યા મ્લેચ્છાશ્ચ ભાગશઃ ।
પીયન્તે યૈરિમા નદ્યો ગઙ્ગા સિન્ધુઃ સરસ્વતી ॥ ૨૪॥

શતદ્રુશ્ચન્દ્ર ભાગા ચ યમુના સરયૂસ્તથા ।
ઇરાવતી વિતસ્તા ચ વિપાશા દેવિકા કુહૂઃ ॥ ૨૫॥

ગોમતી ધૂતપાપા ચ બુદ્બુદા ચ દૃષદ્વતી ।
કૌશિકી ત્રિદિવા ચૈવ નિષ્ઠીવી ગણ્ડકી તથા ॥ ૨૬॥

ચક્ષુર્લોહિત ઇત્યેતા હિમવત્પાદનિસ્સૃતાઃ ।
વેદસ્મૃતિર્વેદવતી વૃત્રઘ્ની સિન્ધુરેવ ચ ॥ ૨૭॥

વર્ણાશા નન્દના ચૈવ સદાનીરા મહાનદી ।
પાશા ચર્મણ્વતીનૂપા વિદિશા વેત્રવત્યપિ ॥ ૨૮॥

ક્ષિપ્રા હ્યવન્તિ ચ તથા પારિયાત્રાશ્રયાઃ સ્મૃતાઃ ।
શોણો મહાનદશ્ચૈવ નર્મ્મદા સુરસા ક્રિયા ॥ ૨૯॥

મન્દાકિની દશાર્ણા ચ ચિત્રકૂટા તથૈવ ચ ।
તમસા પિપ્પલા શ્યેના કરમોદા પિશાચિકા ॥ ૩૦॥

ચિત્રોપલા વિશાલા ચ બઞ્જુલા વાસ્તુવાહિની ।
સનેરુજા શુક્તિમતી મઙ્કુતી ત્રિદિવા ક્રતુઃ ॥ ૩૧॥

ઋક્ષવત્સમ્પ્રસૂતાસ્તા નદ્યો મણિજલાઃ શિવાઃ ।
તાપી પયોષ્ણી નિર્વિન્ધ્યા સૃપા ચ નિષધા નદી ॥ ૩૨॥

વેણી વૈતરણી ચૈવ ક્ષિપ્રા વાલા કુમુદ્વતી ।
તોયા ચૈવ મહાગૌરી દુર્ગા વાન્નશિલા તથા ॥ ૩૩॥

વિન્ધ્યપાદપ્રસૂતાસ્તા નદ્યઃ પુણ્યજલાઃ શુભાઃ ।
ગોદાવરી ભીમરથી કૃષ્ણવેણાથ બઞ્જુલા ॥ ૩૪॥

તુઙ્ગભદ્રા  સુપ્રયોગા બાહ્યા કાવેર્યથાપિ ચ ।
દક્ષિણપ્રવહા નદ્યઃ સહ્ય પાદાદ્વિનિઃસ્મૃતાઃ ॥ ૩૫॥

કૃતમાલા તામ્રપર્ણી પુષ્પજાત્યુત્પલાવતી ।
નદ્યોઽભિજાતા મલયાત્સર્વાઃ શીતજલાઃ શુભાઃ ॥ ૩૬॥

ત્રિસામા ઋષિકુલ્યા ચ બઞ્જુલા ત્રિદિવાબલા ।
લાઙ્ગૂલિની વંશધરા મહેન્દ્ર તનયાઃ સ્મૃતાઃ ॥ ૩૭॥

ઋષિકુલ્યા કુમારી ચ મન્દગા મન્દગામિની ।

કૃપા પલાશિની ચૈવ શુક્તિમત્પ્રભવાઃ સ્મૃતાઃ ॥ ૩૮॥

તાસ્તુ નદ્યઃ સરસ્વત્યઃ સર્વા ગઙ્ગાઃ સમુદ્રગાઃ ।
વિશ્વસ્ય માતરઃ સર્વા જગત્પાપહરાઃ સ્મૃતાઃ ॥ ૩૯॥

તાસાં નદ્યુપનદ્યોઽન્યાઃ શતશોઽથ સહસ્રશઃ ।
તાસ્વિમે કુરુપાઞ્ચાલાઃ શાલ્વા માદ્રેયજાઙ્ગલાઃ ॥ ૪૦॥

શૂરસેના ભદ્રકારા બોધાઃ સહપટચ્ચરાઃ ।
મત્સ્યાઃ કુશલ્યાઃ સૌશલ્યાઃ કુન્તલાઃ કાશિકોશલાઃ ॥ ૪૧॥

ગોધા ભદ્રાઃ કલિઙ્ગાશ્ચ માગધાશ્ચોત્કલૈઃ સહ ।
મધ્યદેશ્યા જનપદાઃ પ્રાયશસ્તત્ર કીર્ત્તિતાઃ ॥ ૪૨॥

સહ્યસ્ય ચોત્તરાન્તેષુ યત્ર ગોદાવરી નદી ।
પૃથિવ્યામપિ કૃત્સ્નાયાં સ પ્રદેશો મનોરમઃ ॥ ૪૩॥

તત્ર ગોવર્દ્ધનં નામ પુરં રામેણ નિર્મિતમ્ ।
રામપ્રિયાથ સ્વર્ગીયા વૃક્ષા દિવ્યાસ્તથૌષધીઃ ॥ ૪૪॥

ભરદ્વાજેન મુનિના તત્પ્રિયાર્થેઽવરોપિતાઃ ।
અતઃ પુરવરોદ્દેશસ્તેન જજ્ઞે મનોરમઃ ॥ ૪૫॥

બાહ્લીકા વાટધાનાશ્ચ આભીરા કાલતોયકાઃ ।
અપરાન્તાશ્ચ સુહ્માશ્ચ પાઞ્ચલાશ્ચર્મમણ્ડલાઃ ॥ ૪૬॥

ગાન્ધારા યવનાશ્ચૈવ સિન્ધુસૌવીરમણ્ડલાઃ ।
ચીનાશ્ચૈવ તુષારાશ્ચ પલ્લવા ગિરિગહ્વરાઃ ॥ ૪૭॥

શકા ભદ્રાઃ કુલિન્દાશ્ચ પારદા વિન્ધ્યચૂલિકાઃ ।
અભીષાહા ઉલૂતાશ્ચ કેકયા દશમાલિકાઃ ॥ ૪૮॥

બ્રાહ્મણાઃ ક્ષત્રિયાશ્ચૈવ વૈશ્યશૂદ્રકુલાનિ તુ ।
કામ્બોજા દરદાશ્ચૈવ બર્બરા અઙ્ગલૌહિકાઃ ॥ ૪૯॥

અત્રયઃ સભરદ્વાજાઃ પ્રસ્થલાશ્ચ દશેરકાઃ ।
લમકાસ્તાલશાલાશ્ચ ભૂષિકા ઈજિકૈઃ સહ ॥ ૫૦॥

એતે દેશા ઉદીચ્યા વૈ પ્રાચ્યાન્દેશાન્નિબોધત ।
અઙ્ગવઙ્ગાશ્ચોલભદ્રાઃ કિરાતાનાં ચ જાતયઃ ॥

તોમરા હંસભઙ્ગાશ્ચ કાશ્મીરાસ્તઙ્ગણાસ્તથા ॥ ૫૧॥

ઝિલ્લિકાશ્ચાહુકાશ્ચૈવ હૂણદર્વાસ્તથૈવ ચ ॥ ૫૨॥

અન્ધ્રવાકા મુદ્ગરકા અન્તર્ગિરિબહિર્ગિરાઃ ।
તતઃ પ્લવઙ્ગવો જ્ઞેયા મલદા મલવર્તિકાઃ ॥ ૫૩॥

સમન્તરાઃ પ્રાવૃષેયા ભાર્ગવા ગોપપાર્થિવાઃ ।
પ્રાગ્જ્યોતિષાશ્ચ પુણ્ડ્રાશ્ચ વિદેહાસ્તામ્રલિપ્તકાઃ ॥ ૫૪॥

મલ્લા મગધગોનર્દાઃ પ્રાચ્યાં જનપદાઃ સ્મૃતાઃ ।
અથાપરે જનપદા દક્ષિણાપથવાસિનઃ ॥ ૫૫॥

પણ્ડ્યાશ્ચ કેરલાશ્ચૈવ ચોલાઃ કુલ્યાસ્તથૈવ ચ ।
સેતુકા મૂષિકાશ્ચૈવ ક્ષપણા વનવાસિકાઃ ॥ ૫૬॥

માહરાષ્ટ્રા મહિષિકાઃ કલિઙ્ગશ્ચૈવ સર્વશઃ ।
આભીરાશ્ચ સહૈષીકા આટવ્યા સારવાસ્તથા ॥ ૫૭॥

પુલિન્દા વિન્ધ્યમૌલીયા વૈદર્ભા દણ્ડકૈઃ સહ ।
પૌરિકા મૌલિકાશ્ચૈવ અશ્મકા ભોગવર્દ્ધિનાઃ ॥ ૫૮॥

કોઙ્કુણાઃ કન્તલાશ્ચાન્ધ્રાઃ કુલિન્દાઙ્ગારમારિષાઃ ।
દાક્ષિણાશ્ચૈવ યે દેશા અપરાંસ્તાન્નિબોધત ॥ ૫૯॥

સૂર્ય્યારકાઃ કલિવના દુર્ગાલાઃ કુન્તલૈઃ સહ ।
પૌલેયાશ્ચ કિરાતાશ્ચ રૂપકાસ્તાપકૈઃ સહ ॥ ૬૦॥

તથા કરીતયશ્ચૈવ સર્વે ચૈવ કરન્ધરાઃ ।
નાસિકાશ્ચૈવ યે ચાન્યે યે ચૈવાન્તરનર્મદાઃ ॥ ૬૧॥

સહકચ્છાઃ સમાહેયાઃ સહ સારસ્વતૈરપિ ।
કચ્છિપાશ્ચ સુરાષ્ટ્રાશ્ચ આનર્તાશ્ચર્બુદૈઃ સહ ॥ ૬૨॥

ઇત્યેતે અપરાન્તાશ્ચ શૃણુધ્વં વિન્ધ્યવાસિનઃ ।
મલદાશ્ચ કરૂષાશ્ચ મેકલાશ્ચોત્કલૈઃ સહ ॥ ૬૩॥

ઉત્તમાનાં દશાર્ણાશ્ચ ભોજાઃ કિષ્કિન્ધકૈઃ સહ ।
તોશલાઃ કોશલાશ્ચૈવ ત્રૈપુરા વૈદિશાસ્તથા ॥ ૬૪॥

તુહુણ્ડા બર્બરાશ્ચૈવ ષટ્પુરા નૈષધૈઃ સહ ।

અનૂપાસ્તુણ્ડિકેરાશ્ચ વીતિહોત્રા હ્યવન્તયઃ ॥ ૬૫॥

એતે જનપદાઃ સર્વે વિન્ધ્યપૃષ્ઠનિવાસિનઃ ।
અતો દેશાન્પ્રવક્ષ્યામિ પર્વતાશ્રયિણશ્ચ યે ॥ ૬૬॥

નિહીરા હંસમાર્ગાશ્ચ કુપથાસ્તઙ્ગણાઃ શકાઃ ।
અપપ્રાવરણાશ્ચૈવ ઊર્ણા દર્વાઃ સહૂહુકાઃ ॥ ૬૭॥

ત્રિગર્ત્તા મણ્ડલાશ્ચૈવ કિરાતાસ્તામરૈઃ સહ ।
ચત્વારિ ભારતે વર્ષે યુગાનિ ઋષયોઽબ્રુવન્ ॥ ૬૮॥

કૃતં ત્રેતાયુગં ચૈવ દ્વાપરં તિષ્યમેવ ચ ।
તેષાં નિસર્ગં વક્ષ્યામિ ઉપરિષ્ટાદશેષતઃ ॥ ૬૯॥

॥ ઇતિ બ્રહ્માણ્ડમહાપુરાણે ભારતવર્ષવર્ણનમ્ ॥

॥ બ્રહ્માણ્ડમહાપુરાણમ્ । વાયુપ્રોક્તં પૂર્વભાગઃ । અનુષઙ્ગપાદઃ - ૨।
અધ્યાયઃ ૧૬ - ભારતવર્ણનમ્ ॥

.. brahmANDamahApurANam . vAyuproktaM pUrvabhAgaH . anuSha NgapAdaH - 2.
adhyAyaH 16 - bhAratavarNanam ..

Notes:
Brahmāṇḍa Mahā-Purāṇa બ્રહ્માણ્ડ મહાપુરાણ; in this chapter has the description about the subcontinent and Karmabhūmi કર્મભૂમિ - Bhāratavarṣa ભારતવર્ષ and it's nine main zones - including the hills, mountains and rivers that span the land.

Encoded and proofread by Ruma Dewan

*Bharatavarshavarnanam in Brahmandamahapurana*
pdf was typeset on November 15, 2023

Please send corrections to *sanskrit@cheerful.com*